**संस्कृतवार्ता:**
**दिनाङ्क : 31/05/2026**
**सायम् - 06:20**

## आदौ मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् भारत-शासनम् राष्ट्रस्य अमूल्य-रिक्थानां संरक्षणार्थं निरन्तरं प्रयतते । सद्य एव नीदरलैण्ड-देशस्य यात्रावधौ चोलकालीन-ताम्र-पट्टिकानां भारताय प्रत्यर्पणम् अपि प्रधानमन्त्रिणा उल्लेखितम्।
- आकाशवाण्याः मन की बात कार्यक्रमे प्रधानमन्त्री आतपात् आत्मानं संरक्षितुं पारम्परिक-पेय-पदार्थानां सेवनाय जनान् अध्यर्थयत्।
- सी.बी.एस.ई. इति केन्द्रीयमाध्यमिकशिक्षापरिषदा ऑन मार्कपोर्टल इति वेबफलकस्य सेवाप्रदातुः सूक्ष्मं निरीक्षणं विधीयते।
- बैडमिण्टन् क्रीडायां सिंगापुर ओपन टूर्नामेंट इति स्पर्धायां भारतस्य सात्विक सांईराज रंकी रेड्डी, चिराग शेट्टी इत्यनयो: युगलेन निर्णायकचक्रे विजयोधिगतः।
- **अपि च**

- आई. पी. एल. क्रिकेट्-क्रीडायां, गुजरात टाइटन्स दलम् अद्य अहमदाबादस्य नरेन्द्र मोदी-क्रीडाङ्गणे निर्णायक-स्पर्धायां रॉयल चैलेंजर्स बेंगलुरु दलेन सह स्पर्धिष्यति।

## अथ वार्ता: विस्तरेण

### मन की बात

प्रधानमन्त्री श्रीनरेन्द्रमोदी सद्य सम्पन्नायाः नीदरलैण्ड देशस्य यात्रायाः उल्लेखं कृत्वा अवदत् यत् तत्रत्यया शासनसंस्थया चोलकालीनाः ताम्रपट्टिकाः भारतदेशाय प्रत्यर्पिताः। आकाशवाण्याः मन की बात कार्यक्रमे श्री मोदी अवोचत् यच् एतेन विश्वव्यापिनः तमिलसमुदायस्य मध्ये विशेषः उत्साहः वर्तते। सः अवदत् यत् एताः पट्टिकाः चोलसाम्राज्यस्य सामुद्रिकशक्तिं दक्षिण-पूर्व-एशियादेशैः सह तेषां सम्बन्धान् च प्रदर्शयन्ति । प्रधानमन्त्री अवदत् यत् भारत प्रशासनम् राष्ट्रस्य अमूल्यरिक्थानां संरक्षणार्थं निरन्तरं प्रयतते । सः प्रोक्तवान् यत् 'ज्ञानभारतम्' अभियानेन छत्तीसगढ-राज्यस्य मल्हार-क्षेत्रे षष्ठ-सप्तमयोः शताब्द्योः पाण्डुवंशस्य महर्षेः बलार्जुनस्य सम्बद्धाः दुर्लभाः तिस्रः ताम्रपट्टिकाः अपि प्राप्ताः।

प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना देशवासिनः वर्तमाने भीषण-ग्रीष्मऋतौ अत्यधिकं सावधानतां धारयितुं प्रशासनेन प्रदत्तानां निर्देशानां पालनं च कर्तुं प्रार्थिताः। आकाशवाण्याः 'मन की बात' कार्यक्रमे सः जनान् पर्याप्त-मात्रायां जलपानं कर्तुं तथा सूर्यतापात् रक्षणोपायान् स्वीकृत्य एव गृहात् बहिर्गन्तुं परामर्शम् अददत्।

प्रधानमन्त्री अवदत् यत् ग्रीष्मतापात् रक्षणं प्राप्तुं आमपन्नम्, तक्रम्, सत्तूपेयम्, बेलपन्नम्, पानकम्, नीरमोर्, सोलकढी चेत्यादीनां सेवनं हितकरम् अस्ति । सः उक्तवान् यत् एते पेयपदार्थाः 'एकभारत-श्रेष्ठभारत' इति भावनां प्रदर्शयन्ति तथा तेषु पूर्वजानाम् अनुभवः निहितः अस्ति ।

प्रधानमन्त्री रांची-नगरे आयोजितायाः राष्ट्रिय-वरिष्ठ-क्रीडासंघ-प्रतियोगितायाः अपि चर्चां अकरोत् । अस्यां प्रतियोगितायां प्रायः अष्टशताधिक क्रीडकाः भागं गृहीतवन्तः। श्रीमोदी गुरिंदर वीर सिंहः, विशाल टी.के., तेजस्विन शंकरः, देव मीणा, कुलदीप कुमारः चेत्येतेभ्यः अभिनन्दनम् अयच्छत् । असौ शतमीटरमितायां-धावनप्रतियोगितायां विजेतृभ्यां गुरिंदर वीर सिंहः, तथा अनिमेष कुजूर चेत्येताभ्यां सह अपि संवादम् अकरोत् । प्रधानमन्त्रिणा उक्तं यत् खगोलशास्त्रं देशस्य प्रत्येकं जनेषु जिज्ञासां जनयति । तेन उक्तं यत् खगोलशास्त्रं देशे शीघ्रं लोकप्रियं भवति । श्रीमोदी युवानः खगोलशास्त्रसमूहे सम्मिलितुं तथा अवकाशकालावधौ तारामण्डलम् द्रष्टुं प्रेरितवान् ।

प्रधानमन्त्री उत्तरप्रदेशस्य एकस्मिन् कुल्यां गङ्गाडॉल्फिन्-प्राणिनः रक्षणसम्बद्धस्य लघुचलच्चित्रस्य अपि उल्लेखं कृतवान्। तेन उक्तं यत् नमामि गङ्गे-अभियानस्य अन्तर्गतं निर्मिता भारतस्य प्रथमा गङ्गाडॉल्फिन्-उद्धार-एम्बुलेन्स् अस्मिन् कार्ये महत्त्वपूर्णां भूमिकां निर्वहति । श्रीमोदी अवदत् यत् गङ्गाडॉल्फिन्-संरक्षणेन नद्याः जैवविविधतायाः तथा अमूल्यायाः प्राकृतिकधरोहरायाः संरक्षणमपि भवति।

**प्रमुखः रक्षा अध्यक्षः**

नूतनः (सीडीएस्) इति प्रमुखः रक्षाध्यक्षः लेफ्टिनेण्ट् जनरल् एन. एस्. राजा सुब्रमणिः अद्य उक्तवान् यत् चिन्तने कर्मणि च नवोन्मेषः सैन्यसामर्थ्यानां विकासं त्वरितं करिष्यति। देशस्य नूतनस्य प्रमुख-रक्षाध्यक्षस्य पदं स्वीकृत्य वार्ताहरैः सह संवादे जनरल् सुब्रमणिः अवदत् यत् सशस्त्रबलानि राष्ट्रहितसंरक्षणे निरन्तरं व्यावसायिकं कार्यसञ्चालनसम्बद्धं निर्णायकं च प्रदर्शनं विहितवन्तः । ते भारतस्य सार्वभौमत्वस्य प्रादेशिक-अखण्डतायाश्च रक्षणाय दृढसंकल्पाः सन्ति। अद्य प्रातः नवदिल्लीस्थे साउथ् ब्लॉक् प्राङ्गणे प्रमुखाय रक्षाध्यक्षाय गार्ड् ऑफ् ऑनर् इति सम्मानः प्रदत्तः। तेन राष्ट्रीय-युद्ध-स्मारके पुष्पाञ्जलिरपि समर्पिता।

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।**

**सी.बी.एस्.ई.**

केन्द्रीयमाध्यमिकशिक्षापरिषदा उक्तं यत् स्वस्य सेवाप्रदातुः ऑनमार्क-पोर्टल इत्यस्यान्तर्गताः ये दोषाः अधुना सार्वजनिकरूपेण आगताः , तेषां विषये सा सावधानतया निरीक्षणं करोति। सामाजिकमाध्यमेषु प्रकाशिते सन्देशे सीबीएसई उक्तवान् यत् विविध-सर्वकारीयसंस्थानानां तथा भारतीयप्रौद्योगिकीसंस्थानानाम् साइबरसुरक्षाविशेषज्ञानां दलम् गतदिनेषु एतासां प्रणालीनां सुदृढीकरणाय तथा तंत्राशं सुरक्षितुं नियुक्तम् अस्ति। सीबीएसई अपि सूचितवान् यत् अभिज्ञाताः दोषाः नियन्त्रणाधीनाः कृताः,सहैव अन्यासां सम्भावितानां त्रुटीनां निवारणार्थं गम्भीरा समीक्षा क्रियते।

**नौसेना प्रमुखः**

एड्मिरल् कृष्णस्वामिनाथन् अद्य नौसेनायाः सप्तविंशति-तमेन प्रमुखत्वेन पदभारं स्वीकृतवान्। असौ एड्मिरल् दिनेश-के.त्रिपाठी इत्यस्य उत्तराधिकारी अभवत्। एड्मिरल् स्वामीनाथेन उक्तं यत् नौसेना समाह्वानपूर्णे, जटिले, अनिश्चिते च वातावरणे सक्रियरूपेण कार्यं कर्तुं प्रवृत्ता अस्ति । सः अवदत् यत् नौसेनायाः आधुनिकीकरणं क्रियते येन उच्चतम-स्तरस्य युद्धक्षमता सुसज्जिता भविष्यति। अस्मिन् अवसरे निवर्तमानः नौसेनाप्रमुखः एड्मिरल् दिनेश के.त्रिपाठी देशस्य नौसेनायाः नेतृत्वं गौरवपूर्णम् अभवत् इति अवदत्। सः प्रोक्तवान् यत् पश्चिम एशियायाः वर्तमानस्थितेः मध्ये भारतीयनौसेनायाः प्रतिबद्धता, व्यावसायिकता च अक्षुण्णा एव स्तः।

**अमेरिका ईरान सन्धिः**

अमेरिकायाः राष्ट्रपतिः डॉनल्ड-ट्रम्पः अवोचत् यत् अमरीका-ईरानेन सह परमाणु-सन्धेः सन्निकटः वर्तते। तथापि तेन सञ्चेतितं यत् यदि संवादो विफलः भवेत् चेत् सैन्य-कार्याचरणस्य विकल्पः अपि तत्परः स्यात् । श्रीमता ट्रम्पेण उक्तं यत् ईरानाय कदापि परमाण्वस्त्र-निर्माणानुमतिः नैव प्रदास्यते। तेनाश्वासितं यत् सन्धिः जाते सति होर्मुज जलडमरूमध्य इत्येतत् शीघ्रम् उद्घाटयिष्यते।

**बैडमिंटन्**

बैडमिण्टन् क्रीडायां सिंगापुर ओपन टूर्नामेंट इति शृङ्खलायाः निर्णायक-स्पर्धा भारतस्य सात्विक सांईराज रंकी रेड्डी, चिराग शेट्टी इत्यनयो: युगलेन विजिता। निर्णायक स्पर्धायां भारतीयदलेन इंडोनेशियायाः मोहम्मद शोहिबुल फिक्री, फजर अलफियान इत्यनयोः युगलम् अष्टादश – एकविंशतिः, एकविंशतिः-सप्तदश, एकविंशतिः-षोडश इति अङ्कान्तरालेन पराजितम् ।

**आई. पी. एल**

आई. पी. एल. क्रिकेट्-स्पर्धामालिकायां निर्णायक-स्पर्धा अद्य अहमदाबादस्य नरेन्द्र मोदी-क्रीडाङ्गणे भविष्यति। क्रीडायां गुजरात टाइटन्स दलम् रॉयल चैलेंजर्स बेंगलुरु दलेन सह स्पर्धिष्यति। स्पर्धाया: आरंभ: सायं सार्ध सप्तवादने भविष्यति।

**।। इति वार्ता: ।।**